SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Special Issue, (December) 2025

# धर्ममीमांसायां मनोविज्ञानस्य तात्त्विकविवेचनम्

**Atul Kumar Shukla**
Research Scholar, Dept. of Vaidic Darshan
Banaras Hindu University, Varanasi, Uttar Pradesh, India
Email: shukla.atul.kumar.1995@gmail.com

**Abstract:** पूर्वमीमांसादर्शनं वेदविहितकर्मप्रामाण्यं, धर्मस्वरूपं, तथा मानवकृतक्रियाणां फलविधानं प्रतिपादयन् भारतीयदर्शनपरम्परायां विशिष्टं स्थानं धारयति। धर्ममीमांसायां मानवकर्मणां प्रयोजननिर्णयः केवलं विधिनिषेधमूलकविचारः न, अपि तु अन्तःकरणवृत्तीनां भूमिका, मनसः ग्रहणशक्तिः, निर्णय-शक्तिः, चेष्टाप्रवर्तक-स्वभावश्च अपि अत्यन्तं महत्त्वपूर्णः। न्यायादिदर्शनैः मनोविज्ञानं पृथक् प्रकारेण निरूपितं, परन्तु भट्टपूर्वमीमांसकेषु मनः परममहत्परिमाणकं, स्वतन्त्रेन्द्रियम्, कर्मविधानस्य मूलाधारभूतं च कथ्यते। धर्ममीमांसायां मनसः अन्तःकरणत्वं, तदीयः साक्षात्कारयोग्यत्वविचारः, ज्ञानोत्पत्तौ तस्य कर्तृत्वाङ्गीकरणं च विशेषरीत्या लक्ष्यते। प्रस्तुतशोधपत्रे मीमांसकदृष्ट्या मनसः स्वरूपं, बाह्यमन्तःकरणभेदः, मनसः नित्यत्वानित्यत्वविचारः, मनसः इन्द्रियसामर्थ्यसम्बन्धः, तथा धर्मकर्मप्रवृत्तौ मनसः निर्णायकभूमिका इत्येते विषयाः सर्वे तात्त्विकदृष्ट्या समीक्षारूपेण प्रस्तुताः। अनेन धर्ममीमांसाया कर्मदृष्टिकेन्द्रता अपि मनसः तत्त्वज्ञानस्य अपेक्षया कथं संविद्यमाना इति स्पष्टं भवति।

**Keywords:** धर्ममीमांसा, मनः, सूक्ष्मतत्त्वम्, अन्तःप्रेरकः, अदृष्टकारणम्, अपरोक्षवृत्तिः, तत्त्वाभासः।

**प्रस्तावना**

भारतीयदर्शनपरम्परायां मनोविज्ञानं न केवलं लौकिकमानसिकवृत्तिमात्रं, अपि तु आध्यात्मिक-वैदिकदृष्ट्या अन्तःकरणस्वरूपस्य गम्भीरचिन्तनं वर्तते। पूर्वमीमांसायां प्रायः कर्ममीमांसा इति निर्दिश्यते, तत्र वेदविहितधर्मस्य निर्णयः विशिष्टतया प्रसिद्धः। यद्यपि मीमांसाशास्त्रस्य मुख्यकेन्द्रबिन्दुः विधि-प्रतिषेधरूपकर्मनिश्चयः, तथापि तत्र अन्तःकरणस्य, विशेषतः मनसः, अतिविशिष्टं स्थानं दृश्यते। मीमांसकाः मनः इन्द्रियभिन्नं, परं ज्ञानेन्द्रियवत् स्वतन्त्रं करणम् इति प्रतिपादयन्ति। न्यायदर्शनं मनः अणुपरिमाणकम् इति वदति, किन्तु भट्टमीमांसके मनः परममहत्येसर्वव्यापकग्रहणसमर्थम् इति अभ्यधत्त। वेदवाक्यानां ग्रहणं, विधिवाक्यस्य अर्थनिश्चितिः, तथा धर्म-अधर्मज्ञानोत्पत्तिः– इत्येतत्सर्वं मनसः विशुद्धतां तथा वृत्तिसामर्थ्यं विना न सम्भवति। अतः धर्ममीमांसायां मनोविज्ञानमेव धर्मज्ञानस्य मूलप्राण इव व्यवहृतम्। अस्य शोधस्य प्रमुखउद्देश्यं तावत् मीमांसादर्शनस्य कर्मप्रधानता अपि मनसः तात्त्विकमीमांसां कियत् गम्भीरतया स्वीकरोति, तस्य प्रकाशनम्।

पूर्वमीमांसाशास्त्रे धर्मस्य विधानात्मकस्य पक्षस्य विचारः प्रधानतया क्रियानिरूपणं प्रति प्रवर्तते। धर्मनिश्चये वेदः करणभावेन प्रवर्तकत्वं वहति, तस्यैव अर्थनिश्चितौ 'इतिकर्तव्यता' नाम प्रामुख्यं मीमांसया विशदीक्रियते। अन्येषु शास्त्रेषु यथा दैवी वा आर्षा परम्परा दीर्घकालपर्यन्तं प्रचलिता दृश्यते, तथैव पूर्वमीमांसायामपि प्राचीना एवं परम्परा सम्यग्व्यवस्थितेति प्रसिद्धम्। श्लोकवार्तिकस्य न्यायरत्नाकरटीकायामाचार्यपार्थसारथिमिश्रेण विस्तरेण मीमांसायाः गुरुपरम्परा निरूपिता– "ब्रह्मा प्रजापतये मीमांसां प्रोवाच, सोऽपीन्द्राय, सोऽप्यादित्याय, स च वशिष्ठाय, सोऽपि पराशराय, पराशरः कृष्णद्वैपायनाय, सोऽपि जैमिनये, स च स्वोपदेशानन्तरमिमं न्यायं ग्रन्थे निबद्धवान्"[1] इति।

एवं ब्रह्मादेवेभ्यः आरभ्य आदित्यपर्यन्तं दैवीश्रृङ्खला प्रवहति। वशिष्ठपर्यन्तात् जैमिनिसमाप्तिपर्यन्तं आर्षपरम्परा दृश्यते। अनन्तरं शबरस्वाम्यादयः आचार्याः यावत् अद्यपर्यन्तं मीमांसाशास्त्रस्य विचारपद्धतिं प्रचलयन्ति। एवं दृश्यते यत् मीमांसाशास्त्रस्य गौरवम् असाधारणं, तदेव कारणं येन आचार्यकुमारिलभट्टः अस्य शास्त्रस्य प्रसाराय महत् प्रयत्नं कृतवान्। तेन सूचितमपि यत् मीमांसायां न्यायमार्गस्य यथार्थज्ञानं वाऽयथार्थज्ञानं वा उभयं गुरुतरदोषावहं भवति, अतः शास्त्रस्य तत्त्वार्थः सम्यक् अवगन्तव्यः। तथाहि श्रूयते–

"मीमांसायां त्विहाज्ञाते दुर्ज्ञाते वा विवेकतः।
न्यायमार्गे महान् दोष इति यत्नोपचर्यता॥"[2] इति।

सर्वेषु दार्शनिकशास्त्रेषु प्रमाण-प्रमेयादीनां विवेचनं स्वस्वमतप्रतिष्ठया कृतं दृश्यते। तेषु अन्तःकरणस्य निरूपणं विशेषरूपेण विवक्षितम्। 'करण' इति शब्दः अनेकसाधारणक्रियायोग्येषु द्रव्येषु प्रयुज्यते। परं तस्मिन् प्रसङ्गे अस्य शब्दस्य इन्द्रियपरिग्राहकत्वमेव प्रमुखम्। करणं द्विविधं – बाह्यकरणं च अन्तःकरणं च। यत् अन्तर्गुणान् गृह्णाति तदन्तःकरणम्, यत् बाह्यविषयगुणानां ग्राहकं तद्बाह्यम् इति सामान्यः भेदः।

**दार्शनिकदृष्ट्या अन्तःकरणसंख्या भिन्ना**

न्याय-वैशेषिकमते मनः नामैकमेव अन्तःकरणं, तन्नित्यम् अणुपरिमाणकम्। सांख्ययोगयोः मनः-बुद्धिः-अहङ्कार इति त्रिविधान्तरङ्गसंस्था स्वीक्रियते; मनः उभयात्मकं ज्ञानेन्द्रियसञ्चारि कर्मेन्द्रियकारकञ्च। अद्वैतवेदान्ते मनः-बुद्धिः-चित्तम्-अहङ्कारः इति चतुष्टयं, किन्तु अनित्यं वृत्तिरूपमेव परिगृहीतम्। भट्टपूर्वमीमांसायां मनः न्यायमतवत् एकमेव अन्तःकरणम्, परन्तु नैयायिकाः अणुपरिमाणं न स्वीकुर्वन्ति। भट्टमतस्य मनः 'परममहत्' परिमाणं धत्त इति तत्र विशेषः। एवं सूर्यकिरणवत् स्पष्टं भवति यत् मीमांसकाः मनसः अन्तःकरणस्वरूपं न्यायादिभ्यः पृथक् प्रकारेण प्रतिष्ठापयन्ति, यतः तेषां दृष्टौ मनः ज्ञानेन्द्रियभिन्नं स्वातन्त्र्ययुक्तमिन्द्रियमिति परिकल्पितम्। धर्ममीमांसकपरम्परायां प्रभाकरमतस्य विशेषतया महत्त्वपूर्णो विषयः मनसः परिमाणनिर्णयः। प्रभाकरमिश्रस्य अभिप्रायानुसारं मनः अणुपरिमाणकं नित्यमेव। न्यायमतभट्टमतयोः सममतत्वेन त्रयाणामपि दर्शनेषु मनः नित्यस्वरूपेण स्वीक्रियते।

प्रत्यक्षज्ञानस्य लक्षणं शास्त्रदीपिकाकारैः "इन्द्रियार्थसंप्रयोगजत्वं प्रत्यक्षम्" इति निर्दिष्टम्। यदि एतत् लक्षणं सर्वत्राङ्गीकार्येत, तर्हि सुखदुःखादिज्ञानम् अपि तादृशमेव स्यात्। किन्तु सुखादीनां विषये 'किमिदं करणम्?' इत्यस्य उत्तराय मनः इत्येव इन्द्रियविशेषः स्वीकर्तव्यः। तदेव तेषां ज्ञानस्य कारणं, यतो हीदृशेषु ज्ञानप्रकारेषु चक्षुरादीनामव्यापारः स्पष्टतया न दृश्यते। तथाह्युच्यते– "इन्द्रियार्थसंप्रयोगजत्वं सुखादिज्ञानेष्वव्याप्तेरहेतुरिति चेत्? न, तेषामपि मनः संज्ञकेन्द्रियसम्प्रयोगजत्वात्। मनः सद्भावे च सुखादिज्ञानमेव प्रमाणम्"[3] इति। मनसः अस्तित्वम् अन्तःकरणविषयकानां प्रत्यक्षज्ञानात् सिद्धम्, न हि बाह्येन्द्रियाणि तत्र निमित्तभूतानि।

**प्रभाकरमतम्**

प्रभाकरमिश्रः मनसः सिद्ध्यर्थं भट्टमतात् भिन्नां प्रतीतिसामग्रीमुपनयति। तस्य मते सुखादयः नित्यात्मगताः विशेषगुणाः। यथैव पार्थिवपरमाणुगतानां रूपादीनां तेजःसंयोगेनोत्पत्तिः दृश्यते, तथैव आत्मनिहितसुखादीनां द्रव्यान्तरसंयोगाद् ज्ञानोत्पत्तिः सम्भवति। तद् द्रव्यान्तरं मन एव इति स मनसः

कारणत्वं स्वीकुर्वन् तदनुमानं स्थापयति।

**कुमारिलभट्टस्य खण्डनम्**

कुमारिलभट्टः अस्य अनुमानस्य अनवगाह्यतां प्रपञ्चयन् वदति– यदि सुखादीनां ज्ञानं द्रव्यान्तरसंयोगजं स्यात्, तर्हि तद्द्रव्यं शरीरमेव स्यात्, यतः शरीरं भोगस्य आश्रयः। आत्मनि सुखाद्युत्पत्तिः शरीरसन्निकर्षादेव; न तु मनसोपन्यस्तसंयोगात्। अतः मनःकारणत्वं तेन न सिध्यति। अन्यच्च, पार्थिवपरमाणुगतगुणोत्पत्तौ यः द्रव्यान्तरसंयोगः दृश्यते, सः तेजोभिः एव सम्भवति। सर्वत्रैव द्रव्यान्तरसंयोगस्य अपेक्षा नास्ति। यथा जलपरमाणौ रसगुणोत्पत्तौ किमपि बहिरन्तरद्रव्यसंयोगः न आवश्यकः। अतः सुखादीनां ज्ञानं येन करणेन भवति, तन्मन इति सिद्धिः भवति। तत्र शरीरसंयोगादेव सुखादिवेदना न सर्वशरीरव्याप्त्या अनुभव्यमाना, अपि तु पादादिदेशे देशविशेषे एव दृश्यते– "मनसः अणुत्वसिद्धेः"[4] इति।

**अणुपरिमाणस्य सिद्धिः**

प्रभाकरमतदृष्ट्या यदि मनः विभु स्वीकृतं स्यात्, तर्हि उपाधिवशात् तस्य सुखादिग्रहणं स्यात्। यथा गगनरूपं श्रोत्रेन्द्रियं कर्णशष्कुल्युपाधिना शब्दग्रहणं करोति, तथा मनसः अपि शरीरावयवविशेषं विना सुखादिग्रहणं न शक्येत। यदि शरीरस्य कश्चन भागः उपाधिः स्यात् तस्य नाशे मनसः अप्युपाधिनाशात् नाशः स्यात्। यदि तु सम्पूर्णशरीरमेव उपाधिः, तर्हि पादस्थितकण्टकप्रभववेदनायाः अनुभवः सर्वाङ्गव्याप्तिवत् स्यात्, यत् न दृश्यते। तस्मात् मनसः अणुपरिमाणत्वं युक्तम्।[5]

अथ च विभुना आत्मना सह विभोः मनसोः संयोगः न सम्भवति-कर्मजन्यसंयोगादयः त्रयः संयोगाः विभुद्रव्ययोः न विद्यन्ते। अतः अणुत्वमेव तर्कसंगतम्। तदेव नित्यं संचारि च। अन्यत्रेन्द्रियाधिष्ठानदर्शनेन मनसः संचारित्वं सिद्धम्। मनसि अन्यत्र प्रवृत्ते इन्द्रियं विषयं न गृहीत्वा तिष्ठति। यत्र तत्र प्रवृत्ते मनसि तत्रैव अनुभूतिः। इत्येवं प्रभाकरमते मनः अणु, नित्यं, सञ्चारि च इति निश्चीयते।[6]

**भट्टमतम्**

भट्टमतावलम्बिनः पुनः मनसः विभुत्वं साधयितुं स्वीयानि अनुमानेषि स्थापयन्ति।[7]

**ज्ञानस्य असमवायिकारणम्**

आत्मवत् मनसः अपि सर्वव्यापकत्वात् विभुस्वभावः सिद्धः। यदा मनः ज्ञानस्य असमवायिकारणम् इति स्वीकृत्य उपपाद्यते, तदा अस्य द्रव्यस्य स्वरूपे विषदं प्रकाशते। ज्ञानोत्पत्तौ आत्मना सह मनसः संयोगनिमित्तत्वम् अनिवार्यम्। आत्मा तु स्वभावेन विभु, अवयवशून्यः तथा सर्वव्यापकः। यदि सर्वगतस्वरूपेण ज्ञानाश्रयेण आत्मना सह असंयोगजन्य-कारणभूतं मनः युगपद् व्यवहारं करोति, तर्हि मनसः अपि विभुत्वम् अपेक्षितम्। यतः यत्र असमवायिकारणं विभौ द्रव्ये संयोगेन प्रवर्तते, तत्र तस्यापि विभुत्वं निवारयितुं न शक्यते। अतएव, आत्मवत् मनः अपि देशकालविभागे न स्याद् सीमितम्, किन्तु व्यापकद्रव्यरूपेण परिगण्यते। एतस्मात् ज्ञान-हेतुत्वमेव मनसो विभुत्वं प्रमाणयति।

**स्पर्शाभावः**

द्रव्यत्वेऽपि स्पर्शरहितत्वं मनसः, आकाशस्य तुल्यं विभुत्वं दर्शयति। मनः द्रव्यत्वेन स्वीकार्यते, किन्तु अन्येन्द्रियैः विपरीतं स्पर्शगुणरहितम्। द्रव्यत्वे सति यदि स्पर्शाभावः दृश्यते, तर्हि तादृशद्रव्यं सामान्यद्रव्यसमूहात् पृथक्कृत्य सूक्ष्मतमानां पदार्थानां कोटौ नीयते। एतेषां मध्ये आकाश एकं प्रमुखद्रव्यम्, यत् द्रव्यत्वेन विद्यमानम्, परन्तु स्पर्शविषये न निर्भरम्, स्वभावेन सर्वगतं च। मनसः अपि यदि द्रव्यम्

अस्ति तथा स्पर्शो न अवलम्ब्यते, तर्हि तत् "आकाशस्य इव, द्रव्यत्वे सति स्पर्शशून्यः पदार्थः सर्वगत एव" इति व्याप्तितः, मनसः व्यापकद्रव्यस्वभावः सिद्ध्यति। इदं तु सूचयति यत् मनः इन्द्रियगोचरवृत्त्याः पारम्, स्थानविशेषे न निरुद्धं, किन्तु सर्वदेहव्यापि तथा सर्वज्ञानानां प्रेरकत्वं वहति।

**मनसो विभुत्वम्**

निरवयवत्वानारम्भकद्रव्यत्वयोः आधारात् मनः यदि निरवयव द्रव्यरूपेण तथा अनारम्भकद्रव्यरूपेण ग्रह्यते, तर्हि तादृशद्रव्याणां स्वभावतः विभुत्वमेव सिद्धं भवति। यतो हि यत्र पदार्थे अवयवरहितत्वम् अस्ति तथा स पदार्थः अन्यद्रव्यनिर्माणहेतुत्वात् अनारम्भक इत्युच्यते, तत्र तत्र आकाशवत् अनन्तव्याप्तित्वं निष्पन्नं भवति। अतः मनसः अपि एतयोः धर्मयोः उपपत्त्या सर्वगतत्वं निश्चितम्।

द्रव्यत्वेन सह भूतत्वस्वीकारस्य आधारेण भाट्टमतानुसारं मनः न केवलं द्रव्यम्, अपि तु भूतविशेषः अपि। यदि मनः भूततत्त्वेषु गणनीयम्, तथा द्रव्यस्वरूपं च स्वीकृतम्, तदा आकाशस्य इव तस्य विभुत्वस्य सिद्धिः स्वत एव भवति। भूतत्वं हि स्वभावतः व्यापकत्वं सूचयति, अतः द्रव्यभूतस्य मनसः सर्वव्याप्तत्वं तर्कसंगतमेव।

इन्द्रियत्वेन स्पर्शशून्यत्वस्य आधारात् यदि मनः इन्द्रियरूपेण प्रतिपद्यते, तथा अन्येन्द्रियभेदात् स्पर्शगुणरहितम्, तर्हि तादृशम् इन्द्रियं श्रोत्रेन्द्रियस्य तुल्यं भविष्यति। यत्र इन्द्रियम् स्पर्शसंयोगमनपेक्ष्य विषयरूपं जानाति, तत्र तत्र विभुत्वधर्मः अनिवार्यः। अतः श्रोत्रवत् मनसः अपि स्पर्शशून्यत्वेन सर्वव्यापकत्वम् उपपद्यते।

**मनसः विभुत्वविषये भट्टमीमांसकानां तर्काः**

भट्टमीमांसकाः मनसो विभुत्वं साधयितुं बहूनि अनुमानानि प्रतिपादयन्ति। तेषां हेत्वाभासपरिहारपूर्वकं यथार्थविवेचनं निम्नलिखितरूपेण वर्ण्यते–

**ज्ञानस्य असमवायिकारणभूतसंयोगस्य आश्रयत्वम्**

प्रथमं यत् अनुमनं प्रस्थाप्यते, तस्य हेतुः अस्ति– "ज्ञानस्य असमवायिकारणसंयोगस्य आश्रयत्वम्" इति। अत्र संयोग इति शब्देन आत्ममनसोः परस्परसम्बन्धः गृह्यते। यत्र यत्र एतादृशः संयोगः ज्ञानकारणत्वेन विद्यते, तत्र तत्र विभुत्वं निश्चितम्। यथा आत्मा सर्वगतत्वेन तादृशसंयोगस्य आश्रयः, तथैव मनसः अपि तत्सामर्थ्यात् विभुत्वं सिद्धम्।

**द्रव्यत्वसहितं स्पर्शाभावः**

द्वितीयं अनुमानम् आधारितम् अस्ति "द्रव्यत्वे सति स्पर्शशून्यता" इति। यत्र द्रव्यं स्यात्, किन्तु स्पर्शधर्मेण रहितं, तत्र तस्य विभुत्वं स्वीकृतम्। यथा आकाशः, दिशा, कालः, आत्मा इत्यादयः। एवमेव मनसः अपि द्रव्यत्वमस्ति, स्पर्शाभावश्च। अतः तस्यापि सर्वव्यापकत्वं सिद्धं भवति।

**निरवयवत्वेन द्रव्यस्य अनारम्भकत्वम्**

तृतीयहेतुः अस्ति– "निरवयवत्वे सति द्रव्यानारम्भकद्रव्यत्वम्" इति। यत् द्रव्यं अवयवशून्यं भवति तथा च अन्यद्रव्यस्य कारणं न भवति, तादृशं द्रव्यं सर्वगतं भवेत्। मनः अवयवरहितं, तथा च न अन्यद्रव्यस्य उत्पादकम्। अतः तदपि विभु।

**द्रव्यत्वेन सह भूतत्वम्**

चतुर्थः तर्कः भट्टानां विशिष्टम्। ते मनसः भूतत्वम् अपि स्वीकरोति। "द्रव्यत्वे भूतत्वम्" इति यत्र दृश्यते, तत्र विभुत्वम् अवश्यं सिध्यति। यथा आकाशः। तस्मात् मनसोऽपि विभुत्वम् अनिवार्यम्।

**इन्द्रियत्वेन सह स्पर्शाभावः**

पञ्चमं अनुमानम् "इन्द्रियत्वे सति स्पर्शशून्यता" इति। यत् इन्द्रियं स्पर्शरहितं स्यात्, तत् विभु भवति। अत्र उदाहरणम् श्रोत्रेन्द्रियम् इति। मनः अपि इन्द्रियं, तथा च स्पर्शाभाववत्, अतः तदपि विभु। स्पन्दाभावस्य सिद्धिः विभुत्वे सिद्धे, स्पन्दाभावोऽपि स्वतः सिद्धः। अत्र कारणं हि यत्र सर्वव्यापकता, तत्र स्पन्दः न सम्भवति।

**प्राभाकरभट्टमतयोः विवादबिन्दुः**

प्राभाकराः वदन्ति– "यदि मनः उपहितं न स्यात् तर्हि तस्य इन्द्रियत्वं न सम्भवति" इति। ते शरीरम् एव मनसः उपाधिरूपेण गृह्णन्ति। भट्टाः तु प्रतिपादयन्ति– मनसः विभुत्वेऽपि उपाधिरूपेण शरीरस्य स्वीकृतिः न आवश्यकम्। कण्टकस्पर्शजन्यवेदनायाः एकदेशवृत्तित्वं स्पष्टं दर्शयति यत् मनसः शरीरव्यापित्वं नैव अनिवार्यम्। मनसि अणुत्वस्य स्वीकारे शरीरस्य सर्वत्र उत्पन्नं सुखं दुःखं वा युगपत् न ज्ञायेत। व्यवहारतया एतन्नोपपद्यते।

**विभुद्रव्ययोरसंयोगविषयः**

प्राभाकराः वदन्ति– "विभुद्रव्ययोः संयोगः असंभवः" इति। भट्टाः प्रतिवदन्ति– कर्मजः संयोगः न भविष्यति, किन्तु अजन्यः संयोगः सम्भवति। दिगाकाशयोः परस्परसंबन्धः ज्येष्ठाकाश-कनीयाकाशभेदः सर्वं विभुद्रव्यसंयोगमेव दर्शयति। अत एव मनसः विभुत्वम् अविरोधेन सिद्धम् सर्वाणि अनुमानानि, उपपत्तयः, प्राभाकरभट्टविवादाः च समन्वित्य दर्शयन्ति यत् मनः महदपरिमाणम्, निरवयवम्, स्पर्शरहितम्, द्रव्यस्वभावयुक्तम्, इन्द्रियत्वगुणयुक्तम् , अत एव विभु इति निष्कर्षः स्पष्टः।

**उपसंहारः**

एवं सम्यगवलोक्यते यत् मीमांसाशास्त्रे मनसः स्वरूपं न केवलं ज्ञानोपयोगि, अपि तु सर्वप्रमाणव्यापारस्य सूक्ष्माधिष्ठानभूतम्। यतः अपरोक्षज्ञानस्य निमित्तत्वं, स्पर्शरहितद्रव्यत्वं, तथा चेष्टासंभवेषु विभुत्वम्– इत्येतानि लक्षणानि मनसः स्वातन्त्र्यं चक्षुरादिभ्यः इन्द्रियेभ्यः पृथग्भावं च प्रतिपादयन्ति। तस्मात् मनो नाम आन्तरप्रेरकम्, आत्मनः सहावस्थितं, ज्ञानप्रवृत्तेः अनिवार्यकारणम् इति सिद्धम्। अतः मनोविज्ञानस्य तत्त्वमीमांसायाः च समन्वये मनः दार्शनिकदृष्ट्या परमसूक्ष्मं, स्वतन्त्रं, चैतन्यव्यापारस्य अनिवार्यं करणम् इति निर्णयः स्थिरीभवति।

## Endnotes

1. श्लोकवार्तिकम् (१.१.२४)
2. तत्रैव (१.१.१५)
3. शास्त्रदीपिका (१.१.४)
4. तत्रैव (१.१.४)
5. मानमेयोदयः (पृ. २०४)
6. प्रकरणपंचिका (पृ. ३३२)
7. मानमेयोदयः (पृ. २०३)। प्रभाकरविजये पृ. ३०-३२ इति स्थाने पूर्वपक्षविभागेऽपि एतेषाम् अनुमानानां निरूपणं दृश्यते।

## Bibliography


- Bhatta, Narayana. *Manameyodaya*. Edited and translated by C. Kunhan Raja and S. S. Suryanarayana Sastri, Adyar Library and Research Centre, 1933.
- Bhatta, Kumarila. *Slokavarttika*. Edited and translated by Ganganatha Jha,

Asiatic Society of Bengal, 1907.

- Misra, Parthasarathi. *Sastradipika*. Edited by Dharmadasa Sastri, Chowkhamba Sanskrit Series Office, 1915.
- Misra, Salikanatha. *Prakaranapancika*. Edited by A. Subrahmanya Sastri, Banaras Hindu University, 1961.
- Sastri, J. S., editor. *Prabhakaravijaya*. Sanskrit Sahitya Parishad, 1932.
- Sastri, S. Subrahmanya, editor. *Mimamsadarsanam (with Sabara-Bhasya)*. University of Poona, 1978.